Rishigautamaproktam Umamaheshvara Dhyanam

# ऋषिगौतमप्रोक्तं उमामहेश्वरध्यानम्

## Document Information

Text title : Rishigautamaproktam Umamaheshvara Dhyanam

File name : umAmaheshvaradhyAnam.itx

Category : shiva, shivarahasya, dhyAnam

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 188-207.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ऋषिगौतमप्रोक्तं उमामहेश्वरध्यानम्

(शिवरहस्यान्तर्गते उग्राख्ये)
गौतम उवाच
मुक्तामालापरीताङ्गं दुकूलपरिवेष्टितम् ।
पञ्चाननमुमाकान्तमनन्तेन्दुरविप्रभम् ॥ १८८॥

चन्द्रार्धशेखरं नित्यं जटामकुटमण्डितम् ।
त्रिपुण्ड्ररेखाविलसद्भालभागमनामयम् ॥ १८९॥

भस्मोद्धूलितसर्वाङ्गं रुद्राक्षाभरणान्वितम् ।
मन्दस्मितमुखाम्भोजमाधारं जगतां प्रभुम् ॥ १९०॥

वेदैरनन्तैरनिशं स्तूयमानमनेकधा ।
वेदात्मकं वेदवेद्यं विष्णुब्रह्मादिवन्दितम् ॥ १९१॥

विष्णुनेत्रार्चितं भक्तकल्पद्रुममुमापतिम् ।
अप्रतिद्वन्द्वमद्वन्द्वं सर्ववृन्दारकार्चितम् ॥ १९२॥

सर्वोत्तममनाद्यन्तं सर्वदेवनिषेवितम् ।
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ॥ १९३॥

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं चिदात्मकम् ।
निष्कलं निर्गुणं शान्तं निरवद्यं निरञ्जनम् ॥ १९४॥

अप्रमेयं जगज्जन्मस्थितिसंहारकारणम् ।
विश्वबाहुं विश्वपादं विश्वाक्षं विश्वशम्भुवम् ॥ १९५॥

विश्वं नारायणाराध्यमक्षरं परमं पदम् ।
विश्वतः परमं नित्यं विश्वस्येशमनामयम् ॥ १९६॥

- -
एवं ध्यात्वा महादेवं सर्वदेवोत्तमोत्तमम् ।

ध्यायेत्ततः परं गौरीमादिविद्यामनामयाम् ॥ १९७॥

- -
लक्ष्मीसेवितपादाब्जां शचीसेवितपादुकाम् ।
सरस्वत्यादिभिर्नित्यं स्तूयमानपदाम्बुजाम् ॥ १९८॥

अधरोष्ठाधरीभूतपक्वबिम्बफलामिमाम् ।
मुखकान्तिकलोद्धूतपूर्णचन्द्रां शिवात्मिकाम् ॥ १९९॥

तिरस्कृतालिमालां तामलकावलिभिः सदा ।
पीनवक्षोजनिर्धूतचक्रवाकवराङ्गनाम् ॥ २००॥

नित्यां तिरस्कृताम्भोजनयनां विश्वमातरम् ।
सीमन्तधिक्कृताशेषकामभल्लामहर्निशम् ॥ २०१॥

भ्रुकुटीनिर्जितानङ्गचापां भक्तजनेष्टदाम् ।
बाहुनालप्रभोद्धतहेमनालां विलासिनीम् ॥ २०२॥

रोमराजितिरोभूतसम्भ्रमभ्रमरावलिम् ।
नाभिरन्ध्रतिरोभूतघनावर्तोमिवर्तुलाम् ॥ २०३॥

उत्तमोरुतिरोभूतरम्भास्तम्भां शुभावहाम् ।
पादयुग्मप्रभापूरनिर्जितारुणपङ्कजाम् ॥ २०४॥

ब्रह्मेन्द्रोपेन्द्रजननीं महेशार्धाङ्गभागिनीम् ।
महेशाश्लिष्टवामाङ्गां वरदाभयदां सदा ॥ २०५॥

प्रसन्नवदनाम्भोजां स्मितपूर्वाभिभाषिणीम् ।
सर्वशृङ्गारवेषाढ्यां नानाभरणभूषिताम् ॥ २०६॥

देवैर्वेदैश्च वेदान्तैः स्तूयमानात्मवैभवाम् । २०७.१
(एवं ध्यात्वा तथाबाह्याप्युपचारान्प्रकल्पयेत् ॥)

॥ इति शिवरहस्यान्तर्गते ऋषिगौतमप्रोक्तं उमामहेश्वरध्यानं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २२। १८८-२०७.१ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 188-207.1..

Notes:

Ṛṣi Gautama ऋषि गौतम while describing to the King, the procedure of UmāMaheshvara Vrata उमामहेश्वरव्रत that is to commence on Bhādrapada Śukla Caturdaśī भाद्रपद शुक्ल चतुर्दशी for observation on Bhādrapada Pūrṇimā भाद्रपद पूर्णिमा; elaborates about the UmāMaheshvara Dhyānam उमामहेश्वर ध्यानम्.
In this Chapter 22, Ṛṣi Gautama ऋषि गौतम further details about the UmāMaheshvara Pūjā उमामहेश्वर पूजा by external means.

Proofread by Ruma Dewan

*Rishigautamaproktam Umamaheshvara Dhyanam*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*